नारद उवाच ।
भूमिदानकृतं पुण्यं पापं तद्धरणे च यत् ।
परभूमौ श्राद्धपापं कूपे कूपदजं तथा ॥
अम्बुवाचीभूखननं वीर्य्यत्यागजमेव च ।
दीपादिस्थापनात् पापं श्रोतुमिच्छामि यत्नत: ॥
अन्यं वा पृथिवीजन्यं पापं मत्प्रश्नत: परम् ।
यदस्ति तत्प्रतीकारं वद वेदविदांवर ! ॥
श्रीनारायण उवाच ।
वितस्तिमानां भूमिञ्च यो ददाति च भारते ।
सन्ध्यापूताय विप्राय स याति विष्णुमन्दिरम् ॥
भूमिञ्च सर्व्वशस्याढ्यां ब्राह्मणाय ददाति य: ।
भूमिरेणुप्रमाणञ्च वर्षं विष्णुपदे स्थिति: ॥
ग्रामं भूमिञ्च धान्यञ्च यो ददात्याददाति च ।
सर्व्वपापविनिर्म्मुक्तौ चोभौ वैकुण्ठवासिनौ ॥
भूमिं दातुञ्च यत्काले य: साधुश्चानुमोदते ।
स च याति च वैकुण्ठं मित्रगोत्रसमन्वित: ॥
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु य: ।
स तिष्ठति कालसूत्रे यावच्चन्द्रदिवाकरौ ॥
तत्पुत्त्रपौत्त्रप्रभृतिर्भूमिहीन: श्रिया हत: ।
पुत्त्रहीनो दरिद्रश्चैवान्ते याति च रौरवम् ॥
गवां मार्गं विनिष्कृष्य यश्च शस्यं ददाति च ।
दिव्यं वर्षशतञ्चैव कुम्भीपाकेषु तिष्ठति ॥
गोष्ठं तडागं निष्कृष्य मार्गं शस्यं ददाति च ।
स च तिष्ठत्यसिपत्रे यावदिन्द्राश्चतुर्द्दश ॥
न पञ्चपिण्डमुद्धृत्य परकूपे च स्नाति य: ।
प्राप्नोति नरकं नैव स्नानजं फलमेव च ॥
कामी भूमौ च रहसि वीर्य्यत्यागं करोति य: ।
स्निग्धरेणुप्रमाणञ्च वर्षं तिष्ठति रौरवे ॥
अम्बुवाच्यां भूखननं य: करोति च मानव: ।
स याति कृमिदंशञ्च स्थितिस्तत्र चतुर्युगम् ॥
परकीयलुप्तकूपे कूपं मूढ: प्रयच्छति ।
पुष्करिण्याञ्च लुप्तायां पुष्करिणीं यो ददाति च ॥
सर्व्वं फलं परस्यैव तप्तसूर्म्मिं व्रजेत्तु स: ।
तत्र तिष्ठति सन्तप्तो यावदिन्द्राश्चतुर्द्दश ॥
परकीयतडागे च पङ्कमुत्सृज्य नोत्सृजेत् ।
रेणुप्रमाणवर्षञ्च ब्रह्मलोके वसेन्नर: ॥
पिण्डं पित्रे भूमिभर्त्तुर्न प्रदाय च मानव: ।
श्राद्धं करोति यो मूढो नरकं याति निश्चितम् ॥
भूमौ दीपं योऽर्पयति स चान्ध: सप्तजन्मनि ।
भूमौ शङ्खञ्च संस्थाप्य कुष्ठं जन्मान्तरे लभेत् ॥
मुक्तामाणिक्यहीरञ्च सुवर्णञ्च मणिन्तथा ।
यश्च संस्थापयेद्भूमौ स तिष्ठेन्नरके युगम् ॥
जपमालां पुष्पमालां कर्पूरं रोचनान्तथा ।
यो मूढश्चार्पयेद्भूमौ स याति नरकं ध्रुवम् ॥
मुने ! चन्दनकाष्ठञ्च रुद्राक्षं कुशमूलकम् ।
संस्थाप्य भूमौ नरके वसेन्मन्वन्तरावधि ॥
पुस्तकं यज्ञसूत्रञ्च भूमौ संस्थापयेत्तु य: ।
न भवेद्विप्रयोनौ च तस्य जन्मान्तरे जनि: ॥
ब्रह्महत्यासमं पापमसुत्र च लभेद्ध्रुवम् ।
ग्रन्थियुक्तं यज्ञसूत्रं पूज्यञ्च सर्व्ववर्णकै: ॥
यज्ञं कृत्वा च यो भूमिं क्षीरेण नहि सिञ्चति ।
स याति तप्तसूर्म्मिञ्च सन्तप्त: सप्तजन्मसु ॥

भूकम्पे ग्रहणे यो हि करोति खननं भुव: ।
जन्मान्तरे महापापी सोऽङ्गहीनो भवेद्ध्रुवम् ॥
भवनं यत्र सर्व्वेषां भूर्भूमिस्तेन कीर्त्तिता ।
वसुरत्नं या दधाति वसुधा सा वसुन्धरा ।
हरेरूरौ च या जाता सा चोर्व्वी परिकी-
र्त्तिता ॥
धरा धरित्री धरणी सर्व्वेषां धारणात्तु या ।
इज्या च यागाधाराच्च क्षौणी क्षीणालये च या ।
महालये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता ॥
काश्यपी कश्यपस्येयमचला स्थिररूपत: ।
विश्वम्भरा तद्धरणाच्चानन्तानन्तरूपत: ॥
पृथिवी पृथुकन्यात्वाद्विस्तृतत्वान्महामुने ! ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे पृथिव्युपाख्याने ७
अध्याय: ॥ * ॥
तस्या भारा यथा,—
क्षितिरुवाच ।
“कृष्णभक्तिविहीना ये ये च तद्भक्तनिन्दका: ।
तेषां महापातकिनामशक्ता भारवाहने ॥
स्वधर्म्माचारहीना ये नित्यकृत्यविवर्जिता: ।
श्रद्धाहीनाश्च वेदेषु तेषां भारेण पीड़िता ॥
पितृमातृगुरुस्त्रीणां पोषणं पुत्त्रपोष्ययो: ।
ये न कुर्व्वन्ति तेषाञ्च न शक्ता भारवाहने ॥
ये मिथ्यावादिनस्तात ! दयासत्यविहीनका: ।
निन्दका गुरुदाराणां तेषां भारेण पीड़िता ॥
मित्रद्रोही कृतघ्नश्च मिथ्यासाक्षिप्रदायक: ।
विश्वासघ्न: स्थाप्यहारी तेषां भारेण पीड़िता ॥
कल्याणयुक्तनामानि हरेर्नामैकमङ्गलम् ।
कुर्व्वन्ति विक्रयं ये वै तेषां भारेण पीड़िता ॥
जीवघाती गुरुद्रोही ग्रामयाजी च लुब्धक: ।
शवदाही शूद्रभोजी तेषां भारेण पीड़िता ॥
पूजायज्ञोपवासानि व्रतानि नियमानि च ।
ये ये मूढा विहन्तारस्तेषां भारेण पीड़िता ॥
सदा द्विषन्ति ये पापा गोविप्रसुरवैष्णवान् ।
हरिं हरिकथां भक्तिं तेषां भारेण पीड़िता ॥
शङ्खादीनाञ्च भारेण पीड़िताहं यथा विधे ! ।
ततोऽधिकेन दैत्यानां तेषां भारेण पीड़िता ॥
इत्येवमुक्त्वा वसुधा रुरोद च मुहुर्मुहु: ।
ब्रह्मा तद्रोदनं दृष्ट्वा तामुवाच कृपानिधि: ॥
भारं तवापनेष्यामि दस्यूनामप्युपायत: ।
उपायतोऽपि कार्य्याणि सिध्यन्त्येव वसुन्धरे ! ॥
मन्त्रं मङ्गलकुम्भञ्च शिवलिङ्गञ्च कुङ्कुमम् ।
मधुकाष्ठं चन्दनञ्च कस्तूरीं तीर्थमृत्तिकाम् ॥
खड्गं गण्डकखड्गञ्च स्फटिकं पद्मरागकम् ।
इन्द्रनीलं सूर्य्यमणिं रुद्राक्षं कुशमूलकम् ॥
शालग्रामशिलाशङ्खतुलसीप्रतिमाजलम् ।
शङ्खप्रदीपमालाञ्च शिलार्च्चांतुलसीं तथा ॥
निर्म्माल्यञ्चैव नैवेद्यं हरिदर्णमणिन्तथा ।
ग्रन्थियुक्तं यज्ञसूत्रं दर्पणं श्वेतचामरम् ॥
गोरोचनाञ्च मुक्ताञ्च शुक्तिं माणिक्यमेव च ।
पुराणसंहितां वह्निं कर्पूरं परशुं तथा ॥
रजतं काञ्चनञ्चैव प्रवालं रत्नमेव च ।
कुशद्विजं तीर्थतोयं गव्यं गोमूत्रगोमयम् ॥

त्वयि ये स्थापयिष्यन्ति मूढाश्चैतानि सुन्दरि ! ।
पच्यन्ते कालसूत्रे च वर्षाणामयुतं ध्रुवम् ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्याय: ॥
तस्या रूपान्तरं यथा,—
“इति तस्य वच: श्रुत्वा जनकस्य तदा क्षिति: ।
मुनीनां सन्निधौ रूपं दर्शयामास भूभृते ॥
नीलोत्पलदलश्यामामक्षमालाब्जधारिणीम् ।
बाहुयुग्मेन शुभ्रेण मृणालायतशोभिना ।
सुन्दरीं लोकधात्रीं तां दृष्ट्वा शम्भुर्नृपोऽभवत् ॥”
इति कालिकापुराणे ३६ अध्याय: ॥
पृथिव्यां ग्रामशस्याद्युत्पत्तिकारणं यथा,—
प्रजा ऊचु: ।
“अराजके नृपश्रेष्ठ ! धरित्र्या सकलौषधी: ।
ग्रस्तास्तत: क्षयं यान्ति प्रजा: सर्व्वा: प्रजेश्वर ! ॥
त्वं नो वृत्तिप्रदो धात्रा प्रजापालो निरूपित: ।
देहि न: क्षुत्परीतानां प्रजानां जीवनौषधी: ॥
श्रीपराशर उवाच ।
ततोऽथ नृपतिर्दिव्यमादायाजगवं धनु: ।
शरांश्च दिव्यान् कुपित: सोऽभ्यधावद्वसुन्धराम् ॥
ततो ननाश त्वरिता गौर्भूत्वा तु वसुन्धरा ।
सा लोकान् ब्रह्मलोकादींस्त्रासादगमन्मही ।
यत्र यत्र ययौ देवी सा तदा भूतधारिणी ।
तत्र तत्र तु सा वैण्यं ददर्शाभ्युद्यतायुधम् ॥
ततस्तं प्राह वसुधा पृथुं पृथुपराक्रमम् ।
प्रवेपमाना तद्बाणपरित्राणपरायणा ॥
पृथिव्युवाच ।
स्त्रीवधे त्वं महापापं किं नरेन्द्र ! न पश्यसि ।
येन मां हन्तुमत्यर्थं प्रकरोषि नृपोद्यमम् ॥
श्रीपृथुरुवाच ।
एकस्मिन् यत्र निधनं प्रापिते दुष्टकारिणि ।
बहूनां भवति क्षेमस्तस्य पुण्यप्रदो वध: ॥
पृथिव्युवाच ।
प्रजानामुपकाराय यदि मां त्वं हनिष्यसि ।
आधार: क: प्रजानान्ते नृपश्रेष्ठ ! भविष्यति ॥
पृथुरुवाच ।
त्वां हत्वा वसुधे ! बाणैर्मच्छासनपराङ्मुखीम् ।
आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजा: ॥
श्रीपराशर उवाच ।
तत: प्रणम्य वसुधा तं भूय: प्राह पार्थिवम् ।
प्रवेपिताङ्गी परमं साध्वसं समुपागता ॥
उपायत: समारब्धा: सर्व्वे सिध्यन्त्युपक्रमा: ।
तस्माद्वदाम्युपायन्ते त्वं कुरुष्व यदीच्छसि ॥
समस्तास्ता मया जीर्णा नरनाथ ! महौषधी: ।
यदीच्छसि प्रदास्यामि ता: क्षीरपरिणामिनी: ॥
तस्मात् प्रजाहितार्थाय मम धर्म्मभृतांवर ! ।
तत्तु वत्सं प्रयच्छस्व क्षरेयं येन वत्सला ॥
समाञ्च कुरु सर्व्वत्र येन क्षीरं समन्तत: ।
वरौषधीबीजभूतं वीर ! सर्व्वत्र भावये ॥
श्रीपराशर उवाच ।
तत उत्सारयामास शैलान् शतसहस्रश: ।
धनुष्कोट्या तदा वैण्यस्तेन शैला विवर्द्धिता: ॥
नहि पूर्व्वविसर्गे वै विषमे पृथिवीतले ।